This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥अथप्रसन्नराघवनाटकंलिख्यते॥चत्वारःप्रथयंतुविद्रुमलतारक्तांगुलिश्रेणयः श्रेयः श्रो
णसरोजकोरकरुचस्तेरङ्गिणःपाणयः॥भालेषड्भ्रुवोलिखंतियुगपद्येपुण्यवर्णावलीःकस्तूरीमकरीःपयो
धरयुगंगंडद्वयंचश्रियः॥१॥अपिच॥आकल्पंमुरजिन्मुखेदुमधुरान्मीलन्मरुन्माधुरीधौरेदात्तमनोहरःसुख
यतुत्वांपांचन्यध्वनिः॥लीलालंबितमंथनादविभवायःकुंभकर्णव्यथादायीरानवदंतिनादःशमुखंदिक्चक्रमाक्रा
मति॥२॥अन्यच्च॥नाभीपद्मवसत्रतुर्मुखमुखोद्गीर्णस्तवाकर्णनप्रोन्मीलत्कमनीयलोचनकलारेखन्मुखेंदुद्यु
तिः॥सक्रोधंमधुकैटभौसकरुणस्नेहंसुतामंबुधेःसोत्रासप्रणयंसरोजवसतिंपश्यन्हरिःपातुवः॥३॥नाट्य

।परिलोवलो
क्य

तेसूत्रधारः॥सहर्षं॥अयेकथमभीनिजवदनशारदारविंदनर्तनगिरिनंदिनीनेत्रखंजनस्यनिखिलमुनिजनहृदय यन
नंदनस्यविकटजटापटलोत्संगुरंगतांडवितगंगातरंगनिकरस्यमंदाकिनीवदनतैलंकायमानमुकुटोपनीतनूतना ग्गटि
सुधाकरस्यत्रिभुवनैलिनीनिर्मूणिनिर्मलबिसांकुरस्यभगवतःशंकरस्ययात्रायांपरिमिलिताएवपारिषदाःनटनानु
पगम्यनिजकलाविलोकनप्रसादायनावदभ्यर्थयामि॥विमृश्य॥अथवाकिमभ्यर्थनया॥यतः॥आकारणैवचनुरा

न

Acc.No. ~~4719~~ M-1614
Title - प्रसन्नराघव - नाटक (अंकपहिला)
Author - जयदेव
Date - ?
Subject - नाटक
folio - 11
Xerox. - 21

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1614
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९।। स्तर्कयंतिपरेंगितं॥गूर्भस्थेकेनकीपुष्पंमामोदैनैवषट्पदाः॥४॥विलोक्यसहर्षं-नूनमनदभिसंधानादेवसामाजिकसमा
ज्ञासादितोयमभिवर्त्ततेसखामेनरंगरंगः।अविदूयनटः।भावेइदंमन्युखेनभवेनमुदीरयंतिसामाजिकाः।अयेयत्किलभर
ताधिराजइत्यर्थोक्तेः।सूत्रधारः।कर्णौपिधाय।अहहअसमंजसमसमंजसं।भवतुकार्यंतावदाकर्णयामि।नटःभाव
धुनामयैर्भक्तसकाशादाकर्णनीयंकिमिदमसमंजसमिति॥सूत्रधारः।नन्विदमवयत्किलनंदतिज्यायसिकनीयसि
राजपदमुपन्यस्यते।अहंहिभरतमात्रकएवमभूपुनरयंजन्मागुणारामनामाराजपदभाजनं।नटः-कीदृशगुणस्तेगुणा
रामः।सू०ननुनामैवदत्तमुत्तरं।न०विहस्यकथंनामैवगुणावगमः॥सू०।अथकिंगुणयामाविसंवादिनामपिहि
महात्मनां-यथसुवर्णश्रीखंडरत्नाकरसुधाकराः।अपिच।किमिदंगुणारामपिकथंनामैवगुणावगमइत्युच्यते।।यः
खलुरक्षिजनकनामधेयस्यनरपतेःसदसिहरचापारोपणनामनाटकमभिनीयपरितुष्टनराज्ञासमर्पितांरंगविद्या
धुरंख्यातिंप्रियामिवसमासादितवान्।न०सपुनःसंप्रतिकदेशमभिनंदति॥सूत्र०केनापिहिदाक्षिण्येननटाप
सदनमदीयमेवदंगुणारामनामेतिवदतारंगविद्याधुरंख्यातिरपह्नुता॥तदाकर्ण्यगुणारामस्तामेवदिशंप्रचलितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधुनाचश्रुतमस्माभिः। यत्किलसुकंठनाम्नागायकेनसहमैत्रीविधायदाक्षिणात्यानांभूभुजांसदसिनेनसहरंगसंगूरुप क्रांतवानिति॥ नटः॥अहोमहानुपक्रमः। सूत्र्यचित्रमिदंयतः। कीर्तिर्मृणालकमनीयभुजामनिंद्यचंद्राननोसिनसरा रुहचारुनेत्रा॥ज्योत्स्नास्मितंमिषदनादविनाभिवस्वालक्ष्यनकः परमुपक्रममानतीति॥ तत्कथयकार्यमार्षः॥ इदमे वयत्किलत्वयाभिनीयमानंविलोकयामइति॥ प्रत्यंकमंकुरितसर्वरसाभिरामंनव्योल्लसत्कुसुमराजिविराजिबंधं॥ घर्मे तरांशुमिववक्त्रनयापिरभ्यंनाट्यप्रबंधमतिमंजुलसंविधानं॥ तत्कथंपुनरवधारणीयंकिन्नामधेयंनाटकमिति॥ विभृत्यः। कथंकरस्थमेवचामीकरंस्थाल्यांमृग्यमाणस्सरणिमनुस्टतोस्मि। विहस्यसहर्षं। अयेकथंसहनिजशि रः श्रियाल्वपिनीलोत्पलंरत्नाकरचपलवीचिमालयपरिसरेविचारयामि॥ नन्विहैवश्लोके। अष्टपक्तिकमलि खितस्फुटमस्तिप्रसन्नराघवनामेति। मार्षः। तेभवश्लोकंपठित्वासहर्षं। अहोदेव्याःकविवदनकुसुदविकाशचं द्रिकायाःप्रसादमहिमासरस्वत्याः। यत्प्रसादादेवंविधाः कवीनांविचित्रमधुराः सूक्तयःसमुल्लसंति॥ सू० एवमे तत्। नन्वनेनैवकविनोक्तं॥ वाणित्वत्सदपद्मरेणुकणिकायास्वांतभूमिंसतांसंप्राप्याकविताऽलंपरिणतासेयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुज्जृंभते॥तत्कर्णेपिचिरायय्किसलयंसूक्तापदेनांशिरःकंपभृंगीतपारिजातकलिकायुष्मद्विधन्तेपदं॥७॥पुनर्वि
भाव्य॥ममपुनःकविकुलकमलसद्मनिमुनौवल्मीकजन्मनिमनःकौतुकितं॥यस्यैकमपिवदनारविंदमासाद्यचतु
र्मुखमुखकमलवनविहारमोदमनुभवतीभारतीनामराजहंसी॥नटः॥एवमेतत्॥त्रिभुवनाभोगेपिहि॥भास्वद्वृत्ता
नंसकीर्तिरंगणीरंगप्रसंगद्वस्वनद्वादित्रप्रथमध्वनिर्विजयतेवल्मीकजन्मामुनिः॥पीत्वायद्वदनेंदुमंडलगलत्को
व्यामृताब्धेःकिमप्याकल्पंकविनूतनांबुदभयीकादंबिनीवर्षति॥विभूत्यैममतुरामचंद्रचंद्रएवनिर्भरमानंदि
तोयचित्तचकोरः॥यत्कीर्तिचंद्रिकाबिंबितायंवाल्मीकेरपिसारस्वतसागरःसमुल्ललास॥सूत्र०इत्यभिदधेचंद्रे
चरामचंद्रेचकांतानोचदृगंचले॥नीलोत्पलसुहृत्कांतोकस्यनामोदतेमनः॥अपिच॥झटितिजगतीमागधस्याःपि
तामहमंडपान्महतिपथियोदेव्यावाचःप्रथमःसमजायत॥अपिकथमसौमुंचेदनानचेदवगाहतेरघुपतिगुणग्या
मश्लाघासुधामयदीर्घिकां॥९॥नटः॥कथंपुनरमीकवयःसर्वेरामचंद्रमेववर्णयंति॥सूत्र०नायंकवीनांकवीनांदोषः
यतः॥स्वसूक्तीनांपात्रंरघुतिलकमेकंकलयतांकवीनांकोदोषः॥सतुगुणगणानामदगुणः॥यदेतेनिःशेषैरपरसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणलुब्धैरिवजगत्यसावेकश्चक्रेसकलभुवसंवासवसतिः॥ अपिच॰भो।वीतंयस्यचिरान्नितंसुचरितंप्रत्तानवीनांकुरःकां
डंपंडितमंडलीपरिचयःकाव्यंनवःपल्लवः॥कीर्तिःपुष्पपरंपरापरिणतिःसोयंकविद्वद्द्रुमःकिंवंध्यःक्रियतेविनारघुकुलो
त्तंसप्रशंसाफलं॥१९॥नटः।कःपुनरस्यकविः।सप्रणयकोपं॥विलासोयद्वाचामसमरसनिष्यंदमधुरःकुरंगास्तावद्बाध
रमधुरभावंगमयति॥कवींद्रःकौंडिन्यःसतवज्रयंदेवस्रवणयोरयासीदात्थ्यंनकिमिहमहादेवनृपयः।अपिच।लक्ष्म
णस्यवयस्यास्यसुमित्रागर्भजन्मनः॥रामचंद्रपदाभोजेभ्रमद्भृंगायतेमनः॥कथमविदितचरितस्यचकारस्यचरितभनु
सृतोस्मीति॥तेनममहस्तेनिजनाटकमर्पयित्वेदमुक्तोसि॥रक्षणीयमिदंसूक्तिनिकरंचोरेभ्यइति।सत्यमयास्यविनयमि
दमुक्तः॥कर्णेनिधायचपिधायचकंठपीठंदृष्ट्वाचमूर्द्धिननेहृदयंचकृत्वा॥चोरापहारचकितनमयात्त्वयाचिरंभेयंकथंस्व
स्तिमौक्तिकगणःपरिरक्षणीयः॥सूत्र॰।कथमलीकंशोकातस्यकवेः॥सुललितवनामुदारवृत्तांकृतिमयवायुवतिंपरस्यहृ
त्वा॥तटमपिपरमर्णवस्यगत्वावदकृतरःसुभगोजनंजनःस्यात्॥नटः।एवमेतत्।नन्वयंप्रमाणप्रवीणोपिभ्रूयते।नुदिहचंद्रा
तपचंडानपयोकविधाताकिंकृत्वयोरकाधिकरणतामालोक्यविस्मितोसि॥सूत्र॰कइहविस्मयः॥एषाकोमलकाव्यकौशलक
लीलावतीभारतीतेषांकर्कशतर्ककेतवकथंवचोद्गारेपिकिंक्षीयते॥येःकांताकुचमंडलेकरसहाःसानंदमारोपिनारत्नैःकिमन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करींद्रकुंभशिखरेनारोपणीयाःशराः॥ नटः।अपिनामस्वयमेवकविताकोविदाःअस्यसूक्तिभिर्विनोदयिष्यंते॥नन्वनेनैवकवि
नोक्तं॥अपिमुद्गुपयातोवाग्विलासैःस्वकीयैःपरभणितिषुतोषयांतिसंतःकियंतः॥निजघनमकरंदस्यंदपूर्णालवालः
कलत्रासलिलसेकंनेहतेकिंरसालः॥१६॥नटः।अहोअस्यकवेःसूक्तीरसालताकोमलताच।सू॰क्वचिद्वक्रनाकिंणनाच
नटः।कथंनेत्रापिरमणीये।सू॰अथकिं।निंद्यंतेयदिनामभंदमनिभेर्वक्राःकवीनांगिरःस्तूयंतेनचनीरसेमृगदृशांवक्राःकटा
क्षच्छटाः॥तद्वैदग्ध्यवतीसतामपिमनःकिंनेहतेवक्रतांधत्तेकिन्नहरःकिरीटशिखरेवक्राकलामिंदवीं॥१७॥अमृतजल
धेःपायंपायंपयांसिपयोधरःकिरतिकरकास्तारकारायदिस्फटिकावनौ॥तद्दिहनुलनामानीयंतेक्षणंकठिनाःसतनममृत
स्यंदोद्गारागिरःप्रतिभावतां॥नूनमस्यकवेःकिमपिकौतुकंप्रमोदमेदुरमंतःकरणं॥यदेवंविधाःसरसचित्तलाःसूक्तयःसमु
ल्लसंति॥सू॰उचितमिदं।यस्याभ्योरःश्रिकुरनिकरःकर्णपूरोमयूरोभासोहासःकविकुलगुरुःकालिदासोविलासः॥हर्षो
हर्षोहृदयवसतिःपंचबाणस्तुकेषांनेषाकथयकवितांकामिनीकौतुकाय॥१९॥अपिचानल्पविद्यानचराज्यलक्ष्मीस्तं
थायथेयंकविताकवीनां॥लोकोत्तरेपुंसिनिवेश्यमानापुत्रीवहर्षंहृदयेकरोति॥२०॥साधुभोकुशीलवकुलोत्तंससाधु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमयं भगवतो याज्ञवल्क्यस्य प्रियंतेवैंसीदाल्भ्यायनइतएवाभिवर्तते तदस्यानवलोकनीयचतुर्थवर्णस्यपुरतस्थातुमनुचितमस्माकं
तदेहिपरतोगच्छावइतिनिष्क्रांतौ॥ ॥प्रस्तावना॥प्रविश्यदाल्भ्यायनः।तमेवश्लोकंपठितासाकूतंसाधूक्तमनेन।तथाहि।भूप
तिरयंजनकोपिसकललोचनानंदमानंडः कश्चिदपिपुरुषप्रकाडनिजांकन्यांसमर्थयितुकामोअस्मद्गुरूपदिष्टायांब्रह्मविद्या
ना यांकुलक्रमागतायांचराज्यलक्ष्म्यांचशिथिलोधरःसंवृत्तः॥पुनःकर्णंदत्वा।कथमयमाकाशवाणीध्वनिःश्रूयते॥तन्नूनमस्म
द्गुरुणासमागच्छतासमीरसंघट्टनकलकलद्वल्लकीगुणनादवर्षिणानारदेनभवितव्यं॥विलोक्यकथंध्वनिसादृश्येनप्रतारितोस्मि
नन्वयंगगनतलावलंबिनोर्मधुरकरयोरेवध्वनिराकर्ण्यते॥पुनःकर्णंदत्वा।सहर्षविस्मयंअहोभगवतोयोगीश्वरस्यप्रसादमहि
मा॥येनाहमेवंविधानामपिवचनावबोधमधुरांसिद्धिमासादितवानस्मि॥तदाकर्णयामिनावत्।किमेनावालपतः कर्णंदत्वो
एकःकिमाह।सखेकलालापकृतआगतोसि॥अपरःकिमाह।वयस्यमधुरप्रियसतनविकस्वराच्चंद्रमौलिमंदाकिनीकुमुद
काननात्।मुनिः।अहोअनयोश्चतुरालापपेशलतोचितनामधेयताच॥पुनकर्णंदत्वाकिमाहमधुरप्रियः॥अस्तिनवीनःको
पिवृत्तांतः।किमाहकलालापः।अस्तिअयमेवाकदाचित्खलुबलिनंदनोबाणासुरःकमलमालयाभगवंतमिंदुमौलिमभ्य
र्थ्यसविनयमिदमूचिवान्।यस्किलभगवन्।कैलासाधिकसारेकिंअस्तिवस्तुमहीतले॥यस्मिन्सफलतामेतिममदोर्दंडमंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं ॥२१॥ततश्च विहस्य भगवान्नृदमाह चंद्रमौलिः ॥ अस्ति मेकार्मुकं दिव्यं न्यस्तं जनकभूभुजि ॥ यस्य बाणान्न लेतिस्रः पुरः प्राप्ताः पतं
गतां ॥२२॥ तदाकर्ण्य बलिनंदनो बाणासुरः तद्धनुर्विलो कयितुं मिथिलामागतः । अहमिहागतः ॥ तत्क्षयं भवान्पुनः कु
तः समायातः कीदृशोवा तत्रनवीनोवृत्तांतइतिदाल्भ्यायनः ॥ किमारुनधुरप्रियः ॥ अहमागतोस्मिन रनचनात् । अथचतत्रमया सकल
लंकेश्वरानुचरस्यगर्जितमाकर्णितं । आः कथंरेनंदनवनस्परक्षिणः अनर्चितचंद्रचूडएव निशाचरचक्रवर्तिनि विल्वैः प्रसून्नंद वन
नैमिति । ततस्तैरिदमुक्तोनिशाचरः क्षन्तव्यमेतत् ॥ अद्य हिजनकराजकन्यकावीरस्वयंवरविलोकनकौतुकितसकलसुरलो
कविमानमंडलायमहानकुसुमोपयोगः तदाकर्ण्यचरदमेववृत्तांतमुपायनीकरोमिलंकेश्वरस्यप्रचलितोनिशाचरः ॥ अह
मपिकौतुकादिहागतोस्मि । दाल्भ्यायनः सविषादं । अहोमहानयमनर्थोकुरोद्रेकः ॥ यदयंबाणरावणयोः कर्णांतिकमपि
विश्रांतःसीतास्वयंवरवृत्तांतइति ॥ अथवा अलमनिकातरतया भ्रमारोविनाअपिभ्रमरोत्कयुसंभवंति । विभृत्यकुलो
भ्रमसंभावना ॥ मकरंदरसस्यंदमधुरोद्गारधारिणी ॥ श्रवणानंदनावंदिना विवराजत ॥२३॥ नेपथ्ये । साधुभगवन्वि
ज्ञातं । वंदिनावेवरयत्वावां । नानादिगंतसमागतनृपतिचक्रवर्तिनायज्ञनकेनसमादिष्टौ । दाल्भ्यायनः । अहोगुणाक्षर
ख्यायः । यदिदंभ्रमरद्वयंप्रतिभयोक्तंवंदिद्वयफलितवचः भवतुतदपिभ्रमरद्वयवृत्तांतमस्मद्गुरवेनिवेदयिष्यामः इतिनिष्क्रांतः ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्कंभकः॥ततः प्रविशति विदूषकः॥एकः। गजेंद्रस्निग्धशालाकाशतनिर्मितेषुमंचेषुआसीनाइमेकुंकुमकांतांगरागाराजानोनुप
लक्षमस्फटिकप्रासादशिखरासंस्थानः केकसिंहाइवशोभंते॥वज्रस्समंजीर॥पेसव२गइद्दसणसिणिद्धसलाआसहस्सणि
म्मिदेसुमंचुएसुआसीणाइमेकुंकुमकअंगराआराआणोअमलफटिअपासाअसिहरासंगिणोकणअसीहाविअ
सोहंति॥अमददुद्धमुद्धसाअरलहरिसिहरावलंविणोअभिणवुग्गमंतःणिसाअरविंबपडिबिंबाविअसोहंति॥स
खेनूपुरकपरयप०। खांखांदिशंश्रितवनानिवहेनराज्ञांमंचावलीवलयमाकलितंविभाति॥सीतास्वयंवरविलोकन
कौतुकेपुंजीकृताइति दिशामिवचक्रवालं॥२९॥अपिचनटतिनरकराग्रव्यग्रसूत्राग्रलग्नाद्विपदज्ञानशालाकामं
चपांचालिकेयं॥त्रिपुरमथनचापारोपणोत्कंठितानामतिरभसवतांचक्षुभ्नांचित्तवृत्तिः॥२६॥नूपुर०वज्रस्समंजी
रकोइमोसीदाकरग्गहवासणावसंतलक्खीविलसंतपुलअमुउलजालमंडिदंणिअभुअसहआरसाहिजुअलंवि
लोअयन्तिचिट्ठदि॥छाया।वयस्यकोयंसीताकरग्रहवासनावसंतलक्ष्मीविलसितपुलकमुकुलजालमंडितंनिजभु
जसहकारशाखियुगलंविलोकयन्तिष्ठति॥मंजीरकः।सएषनिजयशाःपरिमलप्रमोदितचारचंचरीकवयःको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ आहलमुखरिनदिक्चक्रवालः क्ष्मापालकुंतलालंकारोमल्लिकापीडोनाम॥ नूपुर० इमोउणकइमोजो किरदूरावसारिअकणअक्क
इअपाअडिअधणुगुणकिणकसणलोहामंडणेभुअवंडेदवदंतोचिट्ठदि॥ छा० अयंपुनः कनमोयः किलदूरनरापसारि
तकनककटकप्रकटितधनुर्गुणकिणकृष्णलेखामंडनोभुजदंडोविलोकमानस्तिष्ठति॥ मंजीरकः॥ सोयंकुबेरदिग्गना
ललाटतलविलासलंपटः काश्मीरतिलकः॥ नूपुर० इमोउणकोणिअपवादिणअरुग्गमपुव्वगिरिसिहरसहअरंदखि
णभुअदंडमुणमिअवट्टदि॥ छा० अयंपुनः कः निजप्रतापदिनकरोद्गमपूर्वगिरिशिखरसहचरदक्षिणभुजदंडमुन्न
मय्यवर्तते॥ मंजी० सएषनिजप्रतापप्रभापटलपिंजरितनिमलयाचलनितंबतटः कांचीमंडनोवीरमाणिक्यनामानृ
पतिः॥ नू० इमोरहसुहसं॥ नपुलअविसंटुलकपोलथलचलिदकुंडलसरिसणिवसणावदंसेणपाअडिअहरसरास
णकण्णपूरमणोहरोरहदि॥ छा० रभसोल्लसत्कविसंस्थूलकपोलस्थलचलित्कुंडलसदृशनिवेशनापदर्शनप्रकटि
तहरत्नरासनकर्णपूरमनोहरोराजति॥ मंजी० सोयमसमसमरमहार्णवैकमकरोमत्स्यराजः॥ नू० इमोउणको अ
मलमलअजरसधवलिअणिअभुवदंडभुअगराअसिरीससुकुमारंमारविउसरासणंकलयंतोविहुरदि॥ असोपुनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कः श्रमलमलयजरसधवलितनिजभुजदंडभुजंगराजश्रीशिरीषसुकुमारमारिपुशरासनंकलयन्विस्फुरति।मंजी०सए
षविलसमुक्तावलीविराजमानवक्षस्तटस्तुंगभुजांतरःसिंधुराजः।तदलमनेनप्रस्तुतंतावदुपक्रमामहे।परिक्रम्यउ०अथै०अ
होराजानआकर्णयत२आकर्णांतंत्रिपुरमथनोद्दंडकोदंडनिर्घृष्टभोर्वीसुवीविलयतिलकःकोपियःकर्षतीह॥तस्यायांतीप
रिसरभुवंराजपुत्रीभिवृत्तीकृजत्कांचीमुखरजघनाश्रोत्रनेत्रोत्सवाय॥२७॥पुनःसकौतुकं॥सखेदहृदयंतामभी॥कामा
रिकामुकविकर्षणकौतुकोर्ध्वरोमांचितद्विगुणपीवरबाहुदंडाः।सीत्कारयद्भिमिलत्कुतुकातिमात्रविस्तार्यमाणहृदयाः
परितोनरेंद्राः॥पुनःसहर्षं॥कथमुच्चलितमेवसमयसंचरन्मिलत्कपोलतलसंघट्टभग्नरणन्मणिकुंडलेनराजमंडु
लेन।नूपुर०पेसव२इमाणअन्योन्यसंघट्टदृप्तकेयूरसमुच्चलंतकणत्कणमिषेणपरावग्निणोविस्फुलिंगाविअविस्र
संति।छा०एषामन्योन्यसंघट्टमानकेयूरसमुच्चलत्कनत्कणमिषेणप्रतानेविस्फुलिंगाइवविसंति।मंजी०विहस्यापश्य
पत्र्यसुभटैःस्फुटभावंभक्तिरेवगमितानतुशक्तिः॥अंजलिर्विरचितोनतुमुष्टिर्मौलिरेवनमितोनतुचापः॥नृपः
कहंआरंभरमणिज्जोज्जेवइमाणंसरंभो॥कथमारंभरमणीयएवएषांसंरंभः।मंजी०सविषादं।आद्वीपास्परतोप्यभी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृपतयः सर्वेसमभ्यागताः कन्येयंकलधौतकोमलरुचिः कीर्तिश्चलाभास्पदं॥ नाकृष्टंनचटङ्कतंननमितंस्थानाच्चनोच्चाटितं
केनापीदमहोधनुः किमधुनानिर्वीरिसुवीतलंव्यपदिश्यते॥ नूपुर० व अस्सकस्सइमोमही अलचलंतराहुरहअक्कखवक्कसाकंढधुणीसुणीअदि। छा० वय
स्यकस्यायंमहीतलंचलद्राहुर्हचक्रखरकर्कशाःकंठध्वनिःश्रूयते। मंजीरकः। ममाप्ययमपरिक्षितः। तदेनंघृष्टामितावद्
नूपरिक्रम्य। अहोकःखलुभवान्यःसकलदेवादृशिनोममाप्यैपिनविख्यातः। प्रविश्यपुरुषः। साटोपंपरिक्रम्य॥
आः पापवैतालिकापसदकिंनपश्यसिमाटकदुर्विदग्धकथंममापिदृशइत्यधिक्षे। स्वगतं। कथंसंवरणीयंविवरितुमुप
क्रांतोस्मि। भवतु। इदमेवतावन्निर्वाहयामि। कथंममापिदृशादिग्विलासिनीकर्णपूरीकृतकी। र्तिपल्लवंत्रिभुवनवी
रनामधेयंकूपमंडूकइवसागरमपरत्नमपदिक्षसि॥ नकथयसितावत्कर्णेतनिवेद्यानीयगुणंकन्यारत्नंकार्मुकं
च। मंजीरकः॥ इदंतावत्कार्मुकंकन्यातुचरमंलोचनपथमवतरिष्यति। पुरुषः ससंरंभं। धिङ्मूर्खकथंरेरासिनक्ष
त्रपाठकानामपिगोष्ठीनंदृष्टवा। नसितेपरेकन्यामेवप्रथमंप्रकटयंतिरेचेमंधनुः। मंजी० कथमयंवाचाटतांत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कटयति॥ भवत्वनयैवतावदेनं निवारयामि। प्रकाशं। अये एतावतिवीरमंडले भवानेवनस्त्रविद्याकुशलः॥ पुरुषः सक्रोधं। आः
कथंरे अहमेवनस्त्रविद्याकुशलः। मंजीर॰ तत्कथंकामुकमंतरेणैवकन्या विलोकनायोत्कंठसे। पुरुषः साटोपंपरिक्रम्य॥
कथंममापिचापारोपणेसंशयः। मंजी॰ अथकिं। पुरुषः। तदेषममापिसंनाह्यतेयदि। विनैवांभोवाहंबकुलरुचिलिप्ता
चतरलातडिल्लेखवाहेमधुतिवितितिरम्याविलसति॥ यस्त्वाविनैवस्वर्गंगानभसिरभसोन्मुद्रशफरीपरीवर्तैःसाकं
स्फुरतिनवनीलोत्पलवनं॥३१॥ विलोक्यसविस्मयं। कथमस्मत्स्त्रनिज्ञाभंगायविपरीतसृष्टिनैपुण्यंप्रणीतवान्
विधिः॥ नन्विदंतथैवपश्यामि। विमृश्य अथवाकएषविधिरपिमद्विरोधाय॥ मयिक्षीरोदन्वन्निभृतमुरजिन्नाभि
नलिनींनिजक्रीडावापीजलकमलिनींकर्तुमनसि॥ पदभ्रंशाशंकीमधुरमधुरालापचतुरैश्चतुर्भिःसैर्वक्त्रैरनुनय
परोभूदयमपि॥३२॥ पुनर्निपुणंनिरूप्य। अयेसाट्टहास्यास्त्रतारितोस्मि॥ तडिल्लेखानेयंविलसतिपरंसौधशिखरे
वसंत्याःकस्याश्चित्किमपिकरुचिरागात्रलतिका॥ अपीदंनोन्मज्जत्कुवलयवनंभीनतरलंपरंतस्याएवस्फुरतिनय
नालोकललितं॥३३॥ विभाव्यनूनंतदेतत्कन्यारत्नंसीनाभिधानं॥ पुनःसहर्षं॥ राजीवजीवसिमुधानसुधाकरत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्याः पुनः पदनखस्य कृते मुखस्य ॥ अये दृश्यो मृगदृशः कतरः कुरंगस्तत्खंजनस्य कमपि किंजनरंजनाय । पुनः सर्भ
सं । कदलीकदलीकरभः करभः करिराजकरः करिराजकरः ॥ भुवनत्रितयेपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥ ३६ ॥
मंजीर० सरेवनूपुरकीकिमेतत्कस्याश्चिदपहस्तादादाय सानंदमालोक्यत्यंतःपुरिकोजनः० नूपु० । अहमेरिसं संभावे
मि । जं किरणुरभवणादो आगदाएवंदणि आएसमप्पिदं वित्तपदं पुरोचेइदंति ॥ अहमीदृशं संभावयामि यत्किलगु
रुभवनादागतया चंद्रिकयासमर्पितं चित्रपटलं विलोकयंति । मंजी० । सख्याहृष्टश्चित्रपटः नूपु० अथइ । अथ किं
मंजी० नक्तथ्यकिंतत्रलिखितं । नूपु० भट्टदारिआसाव अणंच । कोविलीलुप्पलदाम सोउमालओकुसुमसरसरि
सचू अ कुंउलीकदहरचापोचक्कवट्टिकुमारो । भट्टदारिकानावत् । अत्यंचकोपिनीलोत्पलदाम सुकुमारःकुसुमश
रसदृशरूपःकुंउलीकृतहरचापः चक्रवर्तीकुमारः । मंजी० अहहमुग्धः खल्वबलाजनः । यदेवमपिकठोरप्रतिष्टे
राजनिकिशोरवयसंजामातरमाद्यांसनि । सखेजानासिकेनलिखितंचित्रमिति । नूपु० राणामिमहिंशिणोजण्ण
वक्कस्सदुहित्रधम्म आरिणीये । जानामिमहर्षयात्तवल्यद्वितीयधर्मचारिण्यां । मंजी० सहर्षं इदानीमुद्विग्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मममनोरथंदूरत्र॥देवीहिमैत्रेयीसिद्धयोगिनीकालत्रयदर्शिनीनालीकमालिखनि।नूपु॰सर्वंसंभावीत्रादि।नहसोजठरंगोइ
दोत्रोसरादि॥सर्वंसंभाव्यतेयद्यसोजठरांगःइतोपसरति॥आःकोयंकिमिदंयेनाहमपसारयामि।अयंकिमितस्तोविलो
स्यते।नन्विदंतांभवंधनुःनदिहेवृदीयतोदृष्टिःपुरुषःआःकिमुच्यतेदृष्टिरिति।नन्वियंमुष्टिरपिदीयते।परिक्रम्य।शोखरभं
गाभिनीयसविषादंविलोकयति।मंजी॰अयेलंकेशविस्रस्तशोखरालोकनेननेसमयोयानितचूर्णंगृहाणहरकार्मुकं॥
पुरुषःस्वगतं।कथमनेनविदितोस्मिविमृश्य।अथवाघृणास्परनायंगतंसाहृश्यमेतत्।प्रकाशं।ससंरंभं॥सावहेलक्रम
नीयमुदस्यक्रीडयेवविनिवध्यचभौर्वीं॥कृष्टमेवहरकार्मुकमेतन्नदृश्यतेचसुदृशोहृदयंच॥३६॥धनुषिहस्तमर्पयित्वा॥
स्वगतं।कथंनचलत्यपि।भवतुप्रकाशं।अयेधनुरितिवक्रःपंथाःतत्सरलेनैवकरवालधारापथेनसीतामानयामि॥मंजीरः
कथंमनिष्प्रत्यूहसे।नविलोकयसिकिं॥रोषारुणीकृतविलोचनकोनिभिन्नभ्रूभंगभीमघटितभ्रुकुटीविटंकं॥उत्क्ष
तलोककरवालललाटकालदोर्दंडचरितंनरवीरचक्रं॥३७॥पुरुषःकृपाणमुद्यम्य।परितोवलोक्य॥पश्यैनं।निर्भिन्न
वैरिकरिकुंभघटीविमुक्तमुक्ताफलप्रकरतारकितांबरश्रीः॥यःकालरात्रिरिवभातिरणेसएषरेरेनृपाभमेकृपणःकृपाणः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

आकार्ण्याकर्णदत्ता किंब्रूथ ॥ एकः कथंबहुतरैः सुभटैः करोमि संयामडंबरमिति त्यजरे विषादं ॥ यंमन्यसेसुलभमत्रसहे
वलेन चेतो निधेहि समरेसमरेरवेर्व ॥ ३९ ॥ अहोधृष्टता मनुष्यकीटानां ॥ तदेनान्निजसैन्यैस्तावद्दीषया मि ॥ सोटापं निः
क्रांतः ॥ निपत्य ॥ मंदाकिनीकनकपत्रविसांकुराणां किंचोयदिग्गजलसद्दानांकुराणां ॥ उन्मूलनैरलमनीयतदोश्चवं
येस्तेभुजा ममभुजाग्रकटीभवंतु ॥ ४० ॥ ७ ॥ ततः प्रविश्यनिजरूपेणदशकंठः ॥ नेपु० वअस्सेपरवकोदूहलंजं
एकस्सवि माणुसरस्स दसमछआइ ॥ वयस्येप्रेक्षस्वकोतूहलं ॥ यदेकस्यापिमानुषस्यदशमूर्त्तकानि ॥ मंजी० नैषमानुषः ॥
राक्षसराजः खल्वसौदशकंठः ॥ नूपुर० तापरित्तायदुमं [illegible] वअसोणंररवस्समन्नोज्जे घवेअसमाणुसंवेइ किंपुण
ररवस्सराओ ॥ तत्स्वरित्तायतांभवयस्यः ॥ ननुराक्षसमात्रएवसमुखंपतितंमानुषंवर्तयति किंपुनाराक्षसराजः ॥ मंजी०
अलंकालहरणया ॥ सकलवीरवृंदवंदनीयोहिदृश्यते ॥ तत्कथमस्मद्विधेषुसकलभुवनैकवीरोविपरीतंवर्तिष्यतेदशकंठः
नेपु० सहर्षं ॥ जदिएरिसंता किंपिइदानींसकोपुच्छिस्सं ॥ यदिदृष्टांतः किमपिनिःशंकंष्टच्छामि ॥ उपसृत्य ॥ णए किंणिएत्ति
आइमछ आइउ घहीअदि किंतिवाएकंररवणूण अवराइं [illegible] तकुत्तविणिक्खनावंपित्ति ॥ छाए अवे किमिणिए

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावंतिभस्तकानिछुद्यंते।किमिनिवाएकंरक्षितव्यंअपराणियत्रकापिननिक्षिप्यंते।रावणः।आः पापकथमस्थानेशिरश्छेदवार्त
अमंगलमावेदयसि।।तदेवकेवलंवैनालिकइत्युत्प्रेक्षामः।मंत्री०।विहस्यस्थानेशिरछेदवानपिभवेतामंगलाय।राव०अथकिं
ननुरे।।विद्याधरप्रणयिनीकरपल्लवाग्र।लीलाविमुक्तकुसुमप्रकरावकीर्णैं।।श्रीचंद्रचूडचरणेचरणेनिकामंछिन्नोपिभस्त
कगणोममंगलाय।।४९।।नेपु०।जदिएरिसोतुमंताकित्तिणिअनूयंगोवि अउणेचारघपविट्ठोसि।यदिईदृशास्तंतत्कि
मितिनिजरूपंगोपयित्वाचोरइवप्रविष्टोसि।।रावणः।धिङ्मूर्खनजानासिरे।येचंद्रचूडाचलचालनेकचातुर्यचिंतामणयो
भुजामे।।तैरेवभूयिष्ठतरैःप्रवृत्तश्चापाधिरोपायकथंनलज्जे।।तत्कथयकुत्रजानकीति।मंत्री०अपवार्य।।यस्याःस्वयंकुरुगु
रुःकिलस्यात्तवाल्यस्तातःसएषजनकोजननीधरित्री।।सापित्वमद्यचलदुर्विधिवैरसेनवत्सेनिशाचरवरांकना
भविची।।९२।।नेपु०अपवार्य।।अलंतावेणकहंएत्तिअमत्तम्मिवीरमंडलेकोविणथिजोविमस्सहउप्पउत्तस्सपुरदोहोदि
अलंतापेनकथमेतावत्तिवीरमंडलेकोपिनास्तारत्नप्रवृत्तस्यपुरतोभवति।मंत्री०निश्वस्यकुपितस्यदशाकंठस्यकोना
मपुरोभवतिक्षत्रियःकृतसहस्रबाहोःकार्तवीर्यात्।नेपु०।सहर्षंजीवदम्हेपछरणंपत्तोसहसाबाहूकिवारपुत्ता।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीविनास्मत्प्रेक्षस्व। ननु प्रायः सहस्रबाहुः क्षत्रवीर्यपुत्रः। मंजी॰ धिङ्मूर्खजनादम्यकुगरधारातलनिमग्नः कंसप्रतिकार्तवीर्यः
तन्नूनमयंबाणासुरोभविष्यति। हंतभोतदिहानर्थांतरं। विमृश्य। अथवाविषस्यविषमौषधंभविष्यति॥ ततःप्रविशतिबाणा
सुरः। परिक्रम्यसौटोपं॥ कैलासशैलशिखराद्विभूरिसारं निःसीमभारमधुनाधनुरिंदुमौलेः। आलभ्यपुष्पसदृशंकर
पल्लवेनस्फीतं भुजद्रुमवनंसफलीकरोमि॥४॥ रावणः। अनालोकितेकेन। कथमद्यापिनानीयतेजानकी॥ बाणः विलोक्य
स्वगतं॰ कथमिहदशकंठोपि। प्रकाशं। अहोएतावन्निवीरलोकेनकेनापितावद्गोपितमैश्वरंधनुः। नारोपणीयंवा। रावणः अ
नाकर्णितकेन। कथमद्यापिनानीयतेसीता॥ तदयंचंद्रहासएवमेबलादानयति। बाणः विहस्य। यदीदृशंवीरडंबरंन किमा
रोप्यैवहिहरकार्मुकंनानीयतेसीता॥ आः कोयमलीकपंडितः॥ उद्दंडचंडिमलसद्भुजदंडखंडहेलाचलाचलहराचलचारुकी
र्तेः। ईदृग्यशस्तुलिनबालमृणालकांडकोदंडकर्षणकदर्थनयातयामे॥ बाण॰। सोयमशक्तिप्रकारः। राव॰ आः कथंदृश
मुखस्याप्यशक्तिसंभावना। बाणः विहस्य। अयेबहुमुखतानामबहुश्रुतापितायाः कारणंविक्रमस्यबहुबाहुतैव। राव॰
आः कथंरेपलालभारनिःसारेणभुजभारेणवीरंमन्योसि॥ बाणः सक्रोधं। अयेसमरकलाकुंठदशकंठममापिभुजभारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निःसारं व्यपदिश्यसि॥ नजानासि किं। यतः। अत्रैव। पितुः पादांभोजप्रणतिरभसोत्सिक्तहृदयः प्रयानः पातालं नकतिकतिवारान
करवं॥ सहस्रेवाहूनां क्षितिवलयमासज्यसकलं गलद्धारोद्दंडांफणफलकमालांफणिपतेः॥४२॥ रावणः। अरेवलितनयचलि
तनयदृशिरसियदलीकवर्णनयासत्यविक्रमस्यमेश्वरःस्वात्मानंविडंबयसि॥ बाणः। कथंत्वमेवसत्यविक्रमः॥ रावणः। अथ
किं। दोष्णांनमेविदितवानसिवीरलक्ष्मींप्रासादिभ्रमतांपदवींगरिष्ठां॥ येचंद्रशेखरगिरौकरपल्लवांकपर्यंकशायिनि
दधुःकलत्रप्रतिष्ठां॥ ४७॥ बाणः। अलमलीकविग्रहेण। तदिदंधनुरावयोस्तारम्येनिरूपयिष्यते॥ मंजीर॥ अयेबाण
रावणो किमिदंनरवीरैकसमर्थनीयोसीतापरिणयमनोरथेनविफलत्वमायेस्येतेचेतःपदवीं॥ बाणः। किमेतावता। त्रिपुर
मथनचापारोपणोत्कंठिताधीर्ममजनकपुत्रीपाणिपद्मग्रहाय॥ अपितुबहुलबाहुव्यूढनिर्व्यूढमालाबलपरिमर्दक्लमला
तांडवाडंबराय॥ ४८॥ राव॥ उन्मूलितनशिखरेणहराचलस्यभागेमेभुजवनस्यकृतापरीक्षा॥ एषाविदेहतनयाकुचकुंभके
लिकौलूहलाद्धिरिशाकार्मुककर्मदीक्षा॥ ४९॥ नेपथ्ये। असुरसुरनिशाचरोरगार्णामपिनरकिन्नरसिद्धचारणानां॥ नमयनिय
दिकोपिचापमेतन्ममदुहितुःसकरग्रहंकरोतु॥ ५०॥ राव॥ रेरेभुजाःकुरुतचंद्रकलाकिरीटकोदंडकर्षणयशोधवलांत्रिलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीं ॥ अंगीकुरुष्वमचिरा ञ्चविदेहपुत्रीवक्षोजचंदनरजः परिभूसरत्वं ॥ ५९ ॥ धनुरालोक्य सगतं । अयेदुर्विगाहमिदं नदलमेन
न । प्रकाशं । बाणत्वमेवनावदयेधनुरारोपय । अस्माकमपिनूननागतत्वेनमान्योसि । बाणः । तथास्थितिपरिक्रामति । राव० स
गतं । अयेहृदयअलंकारनया । अयंतावत्क्रूरः कुंठीकृतदशकंठेन्द्रजितिकंठकार्मुके ॥ अन्योपिको पियदिचापमिमंविकृष्य
सीताकरग्रहमभुविदधीतवीरः ॥ लंकांनयामिचगिरानुनयामिचैनं द्रागानयामिविवशेजनकेंद्रपुत्रीं ॥ ५२ ॥ मंजीरकः सरव
पत्रय । बाणस्यबाहुशिखरैः परिपीड्यमानंनेदंधनुश्चलति किंचिदपीदुमौलेः ॥ कामातुरस्यवचसामपिसंनिधानैरभ्यर्थि
तंप्रकुरुतिचारुमनःसतीनां ॥ ५३ ॥ रावणः सविषादं । आत्मगतं । कथमियंसीताप्रत्यूहपिशुनेवदुरुक्तैः मत्सुतिः ॥ प्रकाशं ।
अयेबाण । अपिनामसतेपलालभारनिःसारोभुजभारः । बाणः । कथंभुजमंडलमिदंभालोकयन्नपिकटुभाषितांनमुंचसि ॥ राव० तत्किमेनंनकरिष्यसि ॥ बाणः । यत्कृतंहैहयराजेन । रावणः । इदमसौतेभुजवनंनिजप्रतापानलेनिर्दहामि ॥
बाणः । इममहत्प्रतापानलमनेकरूपचिरचापचुंबिनिजबाहुबलार्कनिवहनिर्मुक्तनाराचधारासारैः शमयामि ॥
राव० रेरेबाणमुंचमयिबाणज्ञानानिपंचनन्वस्तिमेकरतलेकरवालवल्ली ॥ रेपंचबाणविकृणुत्वमपिस्वबाणान्त्वेतिसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुवर्तिलोकललामवल्ली ॥५४॥ नूपु० अये वाणरावणास अंज अअपाण अमणंमाणलज्जेह। अये वाणरावणो स्वयमेवस्तुवंतो
नलज्जेते। राव० धिङ्मूर्वं कथमात्मैकश्लाघनीयोदग्रकंधुः। ननुरे। मंदोदरीकुटिलकोमलकेशभारमंदारदाममकरंदर
संपिबंतः॥ वीणानिनादमधुरं ध्वनिमुद्गिरंतो यद्धिक्कमंमधुकरा अपिकीर्तयंति॥५५॥ वाणः कथमयंसुरतरुकुसुमदाम
कमनीयकामिजनोपभोगसौभाग्यविडंबयति॥ तदिदानीं अमीमेदोर्दंडास्तुलितहरशैलैकशिखरास्तुरासाहंसाहं
हनिकरतलन्यस्तकुलिशं॥ पराभूयस्वैरंनिदधावनमुन्मूल्यसकलंममक्रीडोद्यानंसुरतसमनोज्ञंविदधतु॥५६॥
इतिनिष्क्रांतः॥ रावणः कथमयंनिर्गतः॥ अहंतु अनादृत्यहवासीतांनान्यतोगंतुमुत्सहे॥ नश्वणोमि यदिक्रूरमाक्रंद
मनुज्जीवितः॥५७॥ मंजीरः। वत्सेजानकि अधुनादैवैकरक्ष्यासि। रावणः। कर्णंदत्वा। अयेकस्यायमाक्रंदः श्रूयतेन
भसिनिपुणंनिरूप्य। नूनमनेनकस्यचिन्नाराचपीडितेनकठोरमाक्रंदतागगनपथसारिणामारीचेनभवितव्यं॥
तंदेनमाश्वासयामिनावदिनिष्क्रांतः। नूपुर० सहर्षं। वअस्सदिविआवग्घस्सविअमुहादेकुरंगीविअइमस्सह
देउआरिदाजणइ०॥ वयस्य व्याघ्रस्येवमुखात्कुरंगीवास्यहस्तादुद्धरितांजानकीं॥ मंजी० सखेएवमेतत्। तदेहिवृत्तां
तमिमंजनकराजस्यनिवेदयामः॥ ७॥ ७ ॥ इतिनिष्क्रांताः सर्वे। प्रथमोंकः॥ ७॥ ततःप्रविशतितापसः॥ समं

KKSU LIBRARY
RAMTEK
441 106
M-1614
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 15:13
,TRANSFERRED=2020/09/23 at 15:18:45
,PAGES=21
,TYPE=STD
,NAME=S0003679
,Book Name=M-1614-PRASHAN RAGHAV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection